श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २२

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २२

*अजामिलोपाख्यानम्*

अजामिलो नाम महीसुरः पुरा
 चरन् विभो धर्मपथान् गृहाश्रमी।
गुरोर्गिरा काननमेत्य दृष्टवान्
 सुधृष्टशीलां कुलटां मदाकुलाम्॥ १॥

स्वतः प्रशान्तोऽपि तदाहृताशयः
 स्वधर्ममुत्सृज्य तया समारमन्।
अधर्मकारी दशमी भवन् पुन-
 र्दधौ भवन्नामयुते सुते रतिम्॥ २॥

स मृत्युकाले यमराजकिङ्करान्
 भयङ्करांस्त्रीनभिलक्षयन् भिया।
पुरा मनाक् त्वत्स्मृतिवासनाबला-
 ज्जुहाव नारायणनामकं सुतम्॥ ३॥

दुराशयस्यापि तदात्वनिर्गत-
 त्वदीयनामाक्षरमात्रवैभवात्।
पुरोऽभिपेतुर्भवदीयपार्षदा-
 श्चतुर्भुजाः पीतपटा मनोरमाः॥ ४॥

अमुं च सम्पाश्य विकर्षतो भटान्
 विमुञ्चतेत्यारुरुधुर्बलादमी।
निवारितास्ते च भवज्जनैस्तदा
 तदीयपापं निखिलं न्यवेदयन्॥ ५॥

www.prapatti.com

भवन्तु पापानि कथं तु निष्कृते
कृतेऽपि भो दण्डनमस्ति पण्डिताः।
न निष्कृतिः किं विदिता भवादृशा-
मिति प्रभो त्वत्पुरुषा बभाषिरे॥ ६ ॥

श्रुतिस्मृतिभ्यां विहिता व्रतादयः
पुनन्ति पापं न लुनन्ति वासनाम्।
अनन्तसेवा तु निकृन्तति द्वयी-
मिति प्रभो त्वत्पुरुषा बभाषिरे॥ ७ ॥

अनेन भो जन्मसहस्रकोटिभिः
कृतेषु पापेष्वपि निष्कृतिः कृता।
यदग्रहीन्नाम भयाकुलो हरे-
रिति प्रभो त्वत्पुरुषा बभाषिरे॥ ८ ॥

नृणामबुद्ध्यापि मुकुन्दकीर्तनं
दहत्यघौघान् महिमास्य तादृशः।
यथाग्निरेधांसि यथौषधं गदा-
निति प्रभो त्वत्पुरुषा बभाषिरे॥ ९ ॥

इतीरितैर्याम्यभटैरपासृते
भवद्भटानां च गणे तिरोहिते।
भवत्स्मृतिं कञ्चन कालमाचरन्
भवत्पदं प्रापि भवद्भटैरसौ॥ १० ॥

स्वकिङ्करावेदनशङ्कितो यम-
स्त्वदङ्घ्रिभक्तेषु न गम्यतामिति।
स्वकीयभृत्यानशिशिक्षदुच्चकैः
स देव वातालयनाथ पाहि माम्॥ ११ ॥

**********